# Mahabharata Grantha Kavacham by Valmiki

# વાલ્મીકિકૃતમ્ મહાભારતગ્રન્થકવચમ્

## Document Information

Text title : mahAbhAratagranthakavacham Conveyed by Valimiki to Vyasa

File name : mahAbhAratagranthakavachamvAlmIkikRRitam.inf.itx

Category : misc, advice, bRihaddharmapurANam

Location : doc_z_misc_general

Author : Valmiki

Proofread by : NA

Description/comments : Brihaddharmapuranam | pUrvakhaNDaH | adhyAyaH 30| 4152 ||

Latest update : March 27, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 27, 2023

*sanskritdocuments.org*

# વાલ્મીકિકૃતમ્ મહાભારતગ્રન્થકવચમ્

વાલ્મીકિરુવાચ ।

કવચં કથ્યતે વિપ્ર ભારતસ્ય શ‍ૃણુષ્વ તત્ ।

ૐ નમો ભગવતે તુભ્યં વાસુદેવાય ધીમહિ ।

નરાય પરમેશાય જીવાય પરમાત્મને ॥ ૧॥

આદિપર્વ પાતુ મૂલવીજં પાતુ દ્વિતીયકમ્ ।

ઋષિર્નારાયણઃ પાતુ શક્તીરામાયણં તથા ॥ ૨॥

વિરાટપર્વ છન્દશ્ચ દેવતાર્યાસ્તવોઽવતુ ।

પ્રમાણં ભગવદ્ગીતા શક્તિમાન્ પાતુ ભીષ્મકઃ ॥ ૩॥

પ્રતિપાદ્યં દ્રોણપર્વ કાર્ણં પર્વાર્થકોઽવતુ ।

નિર્ણયઃ શલ્યપર્વ સ્યાત્ કર્તા પાતુ ગદાદિકમ્ ॥ ૪॥

પ્રયોજનં શાન્તિપર્વ સ્વરૂપમાશ્વમેધિકમ્ ।

લક્ષણઞ્ચાવગમ્યઞ્ચ લયશ્ચાન્યાન્યવન્તુ મામ્ ॥ ૫॥

અવ્યાદાચરણીયઞ્ચ સર્વાશ્ચર્યમથોત્તરમ્ ।

એતદ્વૈ કવચં ધૃત્વા કુરુ ભારતમુત્તમમ્ ॥ ૬॥

ભારતે ફલસિદ્ધિશ્ચ કવચાદપ્યતો ભવેત્ ।

પઠ રામાયણં વ્યાસ કાવ્યવીજં સનાતનમ્ ॥ ૭॥

પુરાણાનાઞ્ચ સર્વેષાં ક્રમ એવંવિધો મતઃ ।

અષ્ટાદશ પુરાણાનિ તત્ત્વાન્યષ્ટાદશૈવ તુ ॥ ૮॥

એવઞ્ચોપપુરાણાનિ તત્ત્વાન્યષ્ટાદશૈવ તુ ।

મહાપુરાણેષુ મુને શ્રીભાગવતમન્તતઃ ॥ ૯॥

બૃહદ્ધર્મપુરાણઞ્ચ પુરાણેષ્વિતરેષુ ચ ।

મુને આચરણીયં સ્યાત્ મૂલાદીનીતરાણિ ચ ॥ ૧૦॥

કુરુ સર્વપુરાણાનિ મહાભારતમેવ ચ ।
તેષુ તેષુ પુરાણેષુ મહાભારત એવ ચ ।
યત્ર રામચરિત્રં સ્યાત્ તદહં તત્ર શક્તિમાન્ ॥ ૧૧॥

બ્રહ્મણો વચનં વ્યાસ પ્રતિપાલ્યં કરોમિ વૈ ।
અન્યેષાન્તુ મુનીનાં વૈ ગ્રન્થેષુ સઙ્ગ્રહી કૃતી ॥ ૧૨॥

॥ ઇતિ બૃહદ્ધર્મપુરાણે ત્રિંશત્તમોઽધ્યાયે વ્યાસમહર્ષે
વાલ્મિકીદ્વારા (મહા)ભારતતત્ત્વોપદેશઃ સમ્પૂર્ણઃ ॥

॥ બૃહદ્ધર્મપુરાણમ્ । પૂર્વખણ્ડઃ । અધ્યાયઃ ૩૦। ૪૧-૫૨॥

---

*Mahabharata Grantha Kavacham by Valmiki*
pdf was typeset on March 27, 2023

Please send corrections to *sanskrit@cheerful.com*